"मण्डलं योगपीठन्तु पद्मं पद्मे विचिन्तयेत्।
शावादीन्यासनानीह चत्वार्य्यपि विचिन्तयेत्॥
योगपीठं पृथग्ध्यात्वा मण्डलेन सहैकताम्।
पुनर्ध्यात्वा ततः पश्चात् पूजयेदासनं ततः॥
ध्यानेन योगपीठस्य ध्यात्वा यद्दीयते जलम्।
नैवेद्यपुष्पधूपादि तत् स्वयञ्चोपतिष्ठते॥
सर्व्वे देवाः सगन्धर्व्वाः सचराचरगुह्यकाः।
चिन्तिताः पूजिताश्च स्युर्योगपीठस्य पूजने॥"

इति कालिकापुराणे ५६ अध्यायः॥

योगमाया, स्त्री, (योग एव माया।) भगवती। सा च विष्णुमाया। यथा,—

"ततश्च शौरिर्भगवत्प्रचोदितः
सुतं समादाय स सूतिकागृहात्।
यदा बहिर्गन्तुमियेष तर्ह्यजा
या योगमायाजनिनन्दजायया॥"

इति श्रीभागवते १० स्कन्धे ३ अध्यायः॥

योगरङ्गः, पुं, (योगेन रङ्गो रागो यस्य।) नारङ्गः। इति राजनिर्घण्टः॥ (नारङ्गशब्देऽस्य विशेषो ज्ञेयः॥)

योगराजगुग्गुलुः, पुं, (योगराजाख्यो गुग्गुलुः।) वातरोगादीनामौषधविशेषः। यथा,—

"नागरं पिप्पलीमूलं चव्यं चूषणचित्रकम्।
भृष्टं हिङ्ग्वजमोदा च सर्षपो जीरकद्वयम्॥
रेणुकेन्द्रयवौ पाठा विड़ङ्गं गजपिप्पली।
कटुकातिविषा भार्गी वचा मूर्व्वा च पत्रकम्॥
देवदारु कणा कुष्ठं रास्ना मुस्ता च सैन्धवम्।
एला त्रिकण्टकः पथ्या धान्यकञ्च विभीतकम्॥
धात्री च त्वगुशीरञ्च यवक्षारोऽखिलान्यपि।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्॥
यावन्त्येतानि चूर्णानि तावदेवात्र गुग्गुलुः।
संमर्द्य सर्पिषा पश्चात् सर्व्वं संमिश्रयेच्च तत्॥
एकं पिण्डं ततः कुर्य्यात् धारयेत् घृतभाजने।
गुटिकाष्टकमात्रास्तु खादेत्ताश्च यथोचितम्॥
यथोचितमिति दोषकालानलाद्यपेक्षया॥
परिभाषा च।
आदौ शाणोन्मितं खादेत् ततः कर्षार्द्ध-
मात्रकम्।
ततः कर्षमितं खादेत् गुग्गुलुं क्रमतो नरः॥
दिनानां सप्तके पूर्ब्बे गुग्गुलोः शाणमाहरेत्।
द्वितीये कर्षमर्द्धन्तु पूर्णं कर्षं ततः परम्॥
गुग्गुलुर्योगराजोऽयं महामुख्यो रसायनः।
मैथुनाहारपानानां नियमो नात्र विद्यते॥
सर्व्वान् वातामयान् हन्यात् आमवातमप-
स्मृतिम्।
वातरक्तं तथा कुष्ठं तथा दुष्टव्रणानपि॥
अर्शांसि ग्रहणीरोगं प्लीहगुल्मोदराण्यपि।
आनाहं मन्दमग्निञ्च श्वासं कासमरोचकम्॥
प्रमेहं नाभिशूलञ्च क्रिमिं क्षयमुरोग्रहम्।
शुक्रदोषं रजोदोषमुदावर्त्तं भगन्दरम्॥ * ॥
रास्नादिक्वाथसंयुक्तः सर्व्ववातामयान् हरेत्।
काकोल्यादिश्रितात् पित्तं कफमारग्वधादिना॥
दार्व्वीश्रितेन मेहांश्च गोमूत्रेण च पाण्डुताम्।
मधुना मेदसो वृद्धिं कुष्ठं निम्बशृतेन च॥
छिन्नाक्वाथेन वातास्रं शोफं शूलकजात्
शृतात्।
पाटलाक्वाथसहितो विषं मूषकसम्भवम्॥
त्रिफलाक्वाथसंयुक्तो दारुणां नेत्रवेदनाम्।
पुनर्नवादेः क्वाथेन हन्ति सर्व्वोदराण्यपि॥ * ॥
अत्र रास्नादिक्वाथो यथा,—
रास्ना पुनर्नवा शुण्ठी गुड़ूच्येरण्डजं शृतम्।
सप्तधातुगते वाते सामे सर्व्वाङ्गगे पिबेत्॥
इति योगराजो गुग्गुलुः॥" इति भावप्रकाशः॥

योगरूढः, पुं, (योगार्थप्रतिपादको रूढः।) योगार्थसहभावेन रूढ़ार्थबोधकशब्दः। यथा, "योगरूढ़ाश्च रूढ़ाश्च यौगिकाश्चेति ते त्रिधा॥" "ते शब्दाः पुनस्त्रिधा भवन्ति। योगरूढ़ाः पङ्कजादयः। पङ्कजनिडप्रत्ययैः पङ्कजनिकर्त्तृभिधाय केन योगेनापि पदार्थ एव प्रतिपाद्यते न कुसुमाद्यर्थ इति। योगार्थपुरस्कारेणापि रूढार्थ एवेति योगरूढ़ः। एवं ईश्वरसङ्केतमहिम्ना झटिति पद्मस्यैव स्मृतेः।" इत्यलङ्कारकौस्तुभे २ किरणः॥ ("योगरूढ़ं नाम लक्षयति। 'स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकृन्मिथः। योगरूढ़ं न यत्रैकं विनान्यस्यास्ति शाब्दधीः॥' यन्नाम स्वावयववृत्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकृत् तन्नाम योगरूढ़ं यथा पङ्कजकृष्णसर्पाधर्म्मादि तद्धि शान्तर्निविष्टानां पङ्कादिशब्दानां वृत्तिलभ्येन पङ्कजनिकर्त्रादिना समं स्वशक्यस्य पद्मादेरन्वयानुभावकं, पङ्कजमित्यादितः पङ्कजनिकर्त्तृ पद्ममित्यनुभवस्य सर्व्वसिद्धत्वात्। इयांस्तु विशेषो यद्रूढ़मपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ़ार्थस्यैव रूढार्थविनाकृतस्यापि योगार्थस्य बोधकं मण्डपे शेते इत्यादौ योगार्थस्य मण्डपानकर्त्रादेरिव मण्डपं भोजयेदित्यादौ समुदितार्थस्य गृहादेरयोग्यत्वेनान्वयाबोधात्। योगरूढ़न्तु पङ्कजादिपदमवयववृत्त्या रूढ़ार्थमेव समुदायशक्त्या चावयवलभ्यार्थमेवानुभावयति नत्वन्यं व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात्। अतएव पङ्कजं कुमुदमित्यत्र पङ्कजनिकर्त्तृत्वेन भूमौ पङ्कजमुत्पन्नमित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुमुदस्थलपद्मयोर्बोध इति वार्त्तिकम्। ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयस्याबोधात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थस्यान्वयधीसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्त्रम् एवं पुष्पं पङ्कजमित्यादौ अन्वयबोधदर्शनात्तदनुरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति स्वसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदुपस्थापितस्य पङ्कजातादेः कथं पदान्तरानुपस्थापितं पद्मादावन्वय इति चेदपङ्कजवृत्तिः सत्त्वादौ च व्यभिचाराद्युक्तव्युत्पत्तेः 'स्खलदच्चरसंशोभि तरुण्यास्यपङ्कजम्।' इत्यादौ सङ्कोचेनेनि गृहाण। नच वेणुपदस्य धानकर्म्मत्वविशिष्टायां गवीवपङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढ़िरेवास्तु न तु योगरूढ़िरिति साम्प्रतं अन्यत्र क्लृप्तशक्तिभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्त्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायाशक्यत्वादनन्यलभ्यस्यैव शब्दार्थत्वात्। यद्यपि कर्त्तृवाचकडप्रत्यये एव पद्मत्वविशिष्टस्य लक्षणया लाभसम्भवान्न पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्यैव शब्दशक्यत्वमित्युक्तत्वात् कृतिवर्त्तमानत्वयोरिवैकपदार्थयोरपि कर्त्तृपद्मयोर्मिथोऽन्वयस्य सम्भवित्वात् तथाप्यवयवानां शक्तेरग्रहे ग्रहेऽपि वा पद्मादौ तदर्थस्यान्वयधीविरोधिधीदशायां पङ्कजमस्तीत्यादितः पद्ममस्तीत्याद्यनुभवार्थमवश्यं पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढ़िरपेया इतरथा प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया डप्रत्ययोपस्थापितस्यापि पद्मस्यास्तित्वादिना सहान्वयानुपपत्तेः। अतएव पङ्कजादिपदागृहीतशक्तिकस्य पुंसः पङ्कजमस्तीत्यादितो जात्वपि कर्त्तास्तीत्याकारको नान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्त्तुरन्यत्रान्वये निराकाङ्क्षत्वादिति वक्ष्यते। किन्त्वेवमेकाक्षरकोषावधृतशक्तिकानां कखादिप्रत्येकवर्णानामेव निरूढ़लक्षणया तत्तदर्थानुभावकत्वसम्भवाद्वकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्व्विलीयेत कादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि वकादिशब्दाद्वकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रकृतेऽपि समानं डादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेऽपि पङ्कजादिसमुदायात् पद्मादेरनुभवस्य सर्व्वसिद्धत्वात्। नचैवं चित्रगुरित्यादावपि चित्रगोस्वाम्यादौ समुदायस्य शक्तिप्रसङ्गः समासत्वस्याविशिष्टत्वादिति वाच्यम् अगृहीतावयववृत्तिकस्य पुंसस्ततोऽर्थानधिगमेनावयवानां वृत्तेरवश्यापेक्षायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति।

पङ्कजादिपदेभ्यः केवलस्यैव योगार्थस्य रूढार्थस्य वा बोधव्युदासार्थन्तादृशार्थयोर्मिथः साकाङ्क्षत्वनियमो न कल्प्यते परन्तु रूढार्थभिन्ने योगार्थस्य बोधं प्रति रूढ़िधियः प्रतिबन्धकत्वं तेन रूढेरप्रतिसन्धानदशायामवयवशक्त्यैव पङ्कजं कुमुदमित्यादौ पङ्कजनिकर्त्तृत्वादिना कैरवादेरवगमस्तथावयवशक्तेरनुपस्थितौ समुदायशक्त्यैव भूमौ पङ्कजमुत्पन्नमित्यादौ पङ्कत्वप्रकारेण स्थलपद्मादेरतएव च तैलपदं योगेन तिलप्रभवं रूढ्या विलक्षणद्रवपर्य्यवसितं स्नेहं बोधयेद्योगरूढ़मपि तैलं पत्रमित्यादौ सर्षपस्य तैलमित्यादौ च शक्त्यैव प्रत्येकस्य बोधकमिति मीमांसकानाम्मतमुपन्यस्यति।

'रूढार्थभिन्ने योगार्थबुद्धौ रूढिर्विरोधिताम्।
वदन्ति केचिदेकैकबुद्धिस्तैः क्वचिदिष्यते॥'

क्वचित्समुदायावयवयोरेकमात्रस्य शक्तिप्रति-